॥ श्री गंगास्तोत्रम् ॥

देवि सुरेश्वरि भगवति गंगे त्रिभुवन तारिणि तरल तरंगे ।
शंकर मौलि विहारिणि विमले मम मति रास्तां तव पद कमले ॥ १ ॥

भागीरथि सुखदायिनि मातस्तव जल महिमा निगमे ख्यातः ।
नाहं जाने तव महिमानं पाहि कृपामयि मामज्ञानम् ॥ २ ॥

हरि पद पाद्य तरंगिणि गंगे हिमविधु मुक्ता धवलतरंगे ।
दूरीकुरु मम दुष्कृति भारं कुरु कृपया भव सागर पारम् ॥ ३ ॥

तव जलममलं येन निपीतं परम पदं खलु तेन गृहीतम् ।
मातर्गंगे त्वयि यो भक्तः किल तं द्रष्टुं न यमश्शक्तः ॥ ४ ॥

पतितोद्धारिणि जाह्नवि गंगे खण्डित गिरिवर मण्डित भंगे ।
भीष्म जननि हे मुनिवर कन्ये पतित निवारिणि त्रिभुवन धन्ये ॥ ५ ॥

कल्पलतामिव फलदाम् लोके प्रणमति यस्त्वां न पतति शोके ।
पारावार विहारिणि गंगे विमुख युवति कृततरला पांगे ॥ ६ ॥

तव चेन्मातस्स्रोत स्नातः पुनरपि जठरे सोऽपि न जातः ।
नरक निवारिणि जाह्नवि गंगे कलुष विनाशिनि महिमोत्तुंगे ॥ ७ ॥

पुनरसदंगे पुण्य तरंगे जय जय जाह्नवि करुणा पांगे ।
इन्द्र मुकुटमणि राजित चरणे सुखदे शुभदे भृत्य शरण्ये ॥ ८ ॥

॥ ஸ்ரீ கங்காஸ்தோத்ரம் ॥

தேவி ஸுரேஶ்வரி பகவதி கங்கே, த்ரிபுவன தாரிணி தரல தரங்கே
ஶங்கர மௌலி விஹாரிணி விமலே, மம மதி ராஸ்தாம் தவ பத கமலே

பாகீரதி ஸுகதாயினி மாதஸ், தவ ஜல மஹிமா நிகமே க்யாத:
நாஹம் ஜானே த வ மஹிமானம், பாஹி க்ருபாமயி மாமஞ்ஞானம்

ஹரி பத பாத்ய தரங்கிணி கங்கே, ஹிமவிது முக்தா தவலதரங்கே
தூரீகுரு மம துஷ்க்ருதி பாரம், குரு க்ருபயா பவ ஸாகர பாரம்

தவ ஜலமமலம் யேன நிபீதம், பரம பதம் கலு தேன க்ருஹீதம்
மாதர்கங்கே த்வயி யோ பக்த:, கில தம் த்ரஷ்டும் ந யமஶ்ஶக்த:

பதிதோத்தாரிணி ஜாஹ்னவி கங்கே, கண்டிதகிரிவர மண்டித பங்கே
பீஷ்ம ஜனனி ஹே முனிவர கன்யே,பதிதனிவாரிணி த்ரிபுவனதன்யே

கல்பலதாமிவ பலதாம் லோகே,ப்ரணமதி யஸ்த்வாம் நபததிஶோகே
பாராவார விஹாரிணி கங்கே, விமுக யுவதி க்ருத தரலா பாங்கே

தவ சேன்மாதஸ்ஸ்ரோத ஸ்னாத:, புனரபி ஜடரே ஸோऽபி ந ஜாத:
நரகனிவாரிணி ஜாஹ்னவி கங்கே, கலுஷவினாஶினி மஹிமோத்துங்கே

புனரஸதங்கே புண்ய தரங்கே, ஜய ஜய ஜாஹ்னவி கருணா பாங்கே
இந்த்ர முகுடமணி ராஜித சரணே, ஸுகதே ஶுபதே ப்ருத்யஶரண்யே

रोगं शोकं तापं पापं हर मे भगवति कुमति कलापम् ।
त्रिभुवन सारे वसुधा हारे त्वमसि गतिर्मम खलु संसारे ॥ ९ ॥

अलकानन्दे परमानन्दे कुरु करुणामयि कातर वन्द्ये ।
तव तट निकटे यस्य निवासः खलु वैकुण्ठे तस्य निवासः ॥ १० ॥

वरमिह नीरे कमठो मीनः किं वा तीरे शरटः क्षीणः ।
अथवा श्वपचो मलिनो दीनस्तव न हि दूरे नृपतिकुलीनः ॥ ११ ॥

भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवरकन्ये ।
गंगास्तवमिमममलं नित्यं पठति नरो यस्स जयति सत्यम् ॥ १२ ॥

येषां हृदये गंगा भक्तिः तेषां भवति सदा सुखमुक्तिः ।
मधुरा कान्ता पञ्झटि काभिः परमानन्द कलित ललिताभिः ॥ १३ ॥

गंगास्तोत्रमिदं भवसारं वांछित फलदम् विमलं सारम् ।
शंकरसेवक शंकर रचितं पठति सुखीस्तव इति च समाप्तः ॥ १४ ॥

जय जय गङ्गे जय हर गङ्गे जय जय गङ्गे जय हर गङ्गे
जय जय गङ्गे जय हर गङ्गे जय जय गङ्गे जय हर गङ्गे

ரோகம் ஶோகம் தாபம் பாபம், ஹர மே பகவதி குமதி கலாபம்
த்ரிபுவன ஸாரே வஸுதா ஹாரே, த்வமஸி கதிர்மம கலு ஸம்ஸாரே

அலகானந்தே பரமானந்தே, குரு கருணாமயி காதர வந்த்யே
தவ தட நிகடே யஸ்ய நிவாஸ:, கலு வைகுண்டே தஸ்ய நிவாஸ:

வரமிஹ நீரே கமடோ மீன:, கிம் வா தீரே ஶரட: க்ஷீண:
அதவா ஶ்வபசோ மலினோ தீனஸ், தவ ந ஹி தூரே ந்ருபதிகுலீன:

போ புவனேஶ்வரி புண்யே தன்யே, தேவி த்ரவமயி முனிவரகன்யே
கங்காஸ்தவமிமமமலம் நித்யம், படதி நரோ யஸ்ஸ ஜயதிஸத்யம்

யேஷாம் ஹ்ருதயே கங்கா பக்தி:,தேஷாம் பவதி ஸதாஸுகமுக்தி:
மதுரா காந்தா பஜ்சடி காபி:, பரமானந்த கலித லலிதாபி:

கங்காஸ்தோத்ரமிதம் பவஸாரம்,வாஞ்சித பலதம் விமலம் ஸாரம்
ஶங்கரஸேவக ஶங்கர ரசிதம், படதி ஸுகீஸ் தவ இதி ச ஸமாப்த:

ஜய ஜய கங்கே ஜய ஹர கங்கே, ஜய ஜய கங்கே ஜய ஹர கங்கே
ஜய ஜய கங்கே ஜய ஹர கங்கே, ஜய ஜய கங்கே ஜய ஹர கங்கே

1) ஜெய் ஸ்ரீ கங்கா மாதா கீ—ஜெய்
2) ஜெய் ஸ்ரீ கோமாதா கீ—ஜெய்
3) ஜெய் ஸ்ரீ காவேரி மாதா கீ-ஜெய்
4) ஜெய் ஸ்ரீ வைகை மாதா கீ-ஜெய்
5) ஜெய் ஸ்ரீ ஸுரபி ஸரஸ்வதி மாதா கீ—ஜெய்
6) ஜெய் ஸ்ரீ அன்னபூரணி மாதா கீ—ஜெய்
7) ஜெய் ஸ்ரீ பார்த் மாதா கீ—ஜெய்
08) ஜெய் ஸ்ரீ ஆதிகுருநாத ஸ்வாமி கீ—ஜெய்
09) ஜகந்மாதா புவனேஸ்வரி தேவி கீ—ஜெய்
10) ஜெய் ஸ்ரீ ஸநாதன தர்ம கீ—ஜெய்
11) ஜெய் ஸ்ரீ ஸத்குருநாத மகராஜ் கீ—ஜெய்
12) நம: பார்வதீ பதயே
ஹர ஹர மஹாதேவா
13) கோவிந்தநாமஸங்கீர்த்தனம்
கோவிந்தா கோவிந்தா